**मुख्यवार्ता:**

- स्वदैशिक-विनिर्माणं संवर्धयितुं प्रोत्साहयितुं च वैद्युतकीय-वाहन-नीतिः समारब्धा।
- प्रशासनेन वैकल्पिक-ऑटो-ईन्धन एथेनॉल-शतं इति समुद्घाटितम्।
- केन्द्रीयमन्त्री-पीयूष-गोयल: यथार्थ-समयस्य सूचनां साङ्गडकीय-सुरक्षां च वर्धयितुं राष्ट्रिय-समय-नियमस्य उद्घाटनं कृतवान्।
- विदेशमन्त्रालयेन हैतीइत्यत्र प्रचल्यमाणं घटनाक्रमं अवलोक्य अहोरात्रेः नियन्त्रणकक्षः संस्थापितः।
- बैडमिण्टन प्रतिस्पर्धायां अद्य रात्रौ भारतीयक्रीडकः लक्ष्यसेनः मलेशियायाः ली०जी० जिया इत्यनेन सह ऑल-इंग्लैण्ड-ओपन-चैम्पियनशिप- प्रतिस्पर्धायाः प्रागुपान्त्यचक्रे स्पर्धिष्यते।

**विद्युद्-वाहन**

विद्युद्-वाहननीतिः विद्युद्-वाहनानां स्वदैशिक-निर्माणं प्रोत्साहयितुं वर्धयितुं च केन्द्रसर्वकारेण विद्युद्-वाहननीतेः आरम्भः विहितः। विद्युद्-वाहने निवेशं आक्रष्टुं नीतिः उद्दिश्यते। नीतिः भारतीय उपभोक्तृन् नूतनप्रौद्योगिक्यां प्रवेशाय अपि च मेक इन इण्डिया इत्युपक्रमं सुनिश्चिकरिष्यति। ईवी-चालकानां मध्ये स्वस्थप्रतिस्पर्धां प्रवर्धयित्वा नीतेः उद्देश्यं उत्पादनस्य परिमाणं, परिमाणस्य अर्थव्यवस्थायाः संवर्धनं वर्तते। अपक्वतैलस्य आयातं न्यूनीकर्तुं, व्यापारे हानिं न्यूनीकर्तुं, वायुप्रदूषणं न्यूनीकर्तुं च अस्य उद्देश्यानि सन्ति। यद्यपि उद्योग क्षेत्रैः न्यूनतमं पञ्चाशदधिकैक-शतोत्तर-चतुःसहस्र कोटिरूप्यकाणां निवेशः करणीयं भविष्यति तथापि अधिकतमनिवेशस्य सीमा निर्धारिता नास्ति। उद्यम क्षेत्राणां समीपे निर्माणसौविध्यानां स्थापनायै विद्युद्-वाहनानां व्यावसायिकोत्पादनं आरम्भाय त्रीणि वर्षाणि यावत् समयः भविष्यति।

**एथनॉल**

प्राकृतिक-वायु-मन्त्री हरदीपसिंहपुरी अद्य नवदिल्ल्याः वैकल्पिक-आटो-ईन्धनं इथेनॉलशतम् समुद्घाटितवान् श्रीपुरिणा निगदितं यत् इथेनॉलशतं एतादृशं हरितईन्धनं यस्योपरि प्रधानमन्त्रिणा श्रीमोदिना ध्यानं प्रदत्तम्, तत् सम्प्रतिदेशस्य आर्थिकवृद्धिं स्थापयितुं महत्वपूर्ण-भूमिकां निभालयिष्यति। अनेन ईन्धनेन-ग्रीनहाउस-वायुनां अल्पोत्सर्जनं करिष्यति। अपि च जलवायु-परिवर्तनस्य प्रभावान् न्यूनीकर्तुं वायुगुणवत्तायां च संशोधनाय साहाय्यं करिष्यति।

**सीतारामन-अर्थव्यवस्था:**

वित्तमन्त्रिणा निर्मलासीतारमण इत्यनया निम्नस्तरं प्राप्तुं क्षेत्रान्तरेषु संशोधनानां कृते केन्द्रराज्ययोः स्थानीयनिकायानां च मध्ये अधिकसमन्वयस्य आवश्यकतायाः उपरि बलं प्रदत्तवती। अद्य एकस्मिन् निजवार्ताप्रवाहिकायाः कार्यक्रमे सीतारमणः प्रोक्तवती यत् जनान् आधारभूत सौविध्यप्रदानेन सशक्तिकरणेन च स्वयमेव अधिकाराणां मान्यतां सम्भविष्यति। मन्त्रिणा प्रकाशितं यत् प्रत्यक्षवैदेशिक निवेशप्रवाहस्य वर्तमानरुचिः शीर्षस्थाने अस्ति, अपि च अस्याः इतोपि अग्रे गन्तुम् आशास्ति। साऽवोचत् यत्, स्वदेशिक सञ्चयनाय उपभोक्तृव्ययः संवर्धनाय च सर्वकारः विविधाः योजनाः उपयुज्यन्ते।

**प्रधानमन्त्री – तमिलनाडु**

भारतीय जनतापार्टीतिदलस्य वरिष्ठनेता प्रधानमन्त्री च नरेन्द्रमोदी अद्य केरलराज्यस्य पतनमतिट्टा-जनपदे लोकसभा-निर्वाचन-प्रचार-कार्यक्रमे भागं भजितवान्। श्रीमोदिना पतनमतिट्टा-मवेलिक्कारा-इत्यनयोः लोकसभा-क्षेत्रेषु एन्०डी०ए० इत्यस्य प्रत्याशीनां अभियाने ध्यानं

केन्द्रयित्वा एक-लक्षाधिका कार्यकर्तार: सम्बोधिता:। श्रीमोदिना कथितं यत् भाजपादलं आगामि-लोकसभा-निर्वाचने केरलात् आसनं विजेष्यति। भारतीय-जनता-पाटीर्तिदलस्य वरिष्ठनेता प्रधानमन्त्री च नरेन्द्रमोदी अद्य तमिलनाडु राज्ये जनसभां एकां सम्बोधयन् प्रोक्तवान् यत् शासनारूढाय भाजपेतिदलाय अशेषे हि देशे समर्थनं तमिलनाडुराज्यात् समारब्धम्। असौ कन्याकुमारी नगरस्य अगस्त्येश्वरम् स्थले एकां सार्वजनिक-सभां सम्बोधयन् एकनवत्यधिक-नवदश तमवर्षस्य कन्याकुमारीत: कश्मीरं यावत् यात्रामपि स्मारितवान्। देशस्य विकासे बाध्यकारि-प्रवञ्चनानामपि उल्लेखं कुर्वन् प्रधानमन्त्री समुदीरितवान् यत् गठबन्धने सम्माविष्टानि दलानि कदापि जनकल्याणं न वाञ्छितानि। प्रधानमन्त्री अकथयत् यत् तमिलनाडो: अभिज्ञान-प्रतीक-रूपेण सेंगोल इति संसदि स्थापितम्। तेनोक्तं अग्रे यत् भारतीयजनता-पार्टीति दलस्य प्रशासनेन त्रिंशदधिकैकशत-कोटि-रूप्यकाणां आधारभूत-विकासात्मक-परियोजना: अपि प्रचालिता:। अस्माकं वार्ताहर: सूचितवान् यत् प्रधानमन्त्री सार्वजनिकोपवेशनानां सम्बोधनाय सोमवासरे मंगलवासरे च सेलम-कोयम्बटूर-नगरे प्रति गच्छेत्। एतदनन्तरं श्रीमोदी श्व: कर्णाटकराज्यं प्रति यास्यति। यत्र असौ सोमवासरे कलबुर्गी-शिवमोग्मा-स्थलयो: सार्वजनिक-जनसभां सम्बोधयिष्यति। पञ्चवर्षाणाम् अनन्तरं तेलुगु-देशम-पार्टीतिदलं साम्प्रतिके समये एन०डी०ए० इत्यस्मिन् दले समाविष्टम्।

**निर्वाचनायुक्त:**

श्री ज्ञानेशकुमार: डॉ० सुखबीर सिंह संधू इत्येतौ अद्य भारत-निर्वाचनायोगस्य निर्वाचनायुक्त-रूपेण पदभारं स्वीकृतवन्तौ। मुख्य-निर्वाचनायुक्तेन श्रीराजीवकुमारेण निर्वाचनसदने नवनियुक्ताभ्यां निर्वाचनायुक्ताभ्यां आगामि-द्वादश-सप्ताहा: व्यस्ता: समाह्वानयुता: भविष्यन्ति। श्रीराजीवकुमारेण अस्मिन् ऐतिहासिके समये भरतनिर्वाचनायोगे उभयो: निर्वाचनायुक्तयो: नियुक्ते: महत्वे बलं प्रदत्तम्। सम्प्रति भारत-निर्वाचनायोग: विश्वस्य बृहत्तमे लोकतन्त्रे चतुर्विंशत्यधिक-द्विसहस्र तम वर्षस्य सामान्य-निर्वाचनाय पूर्णरूपेण सज्ज: अस्ति। निर्वाचनायुक्तयो: नियुक्ति-सम्बद्धा मार्चमासस्य चतुर्दश-दिनांके राजपत्रे प्रकाशितम् आसीत्।

**राष्ट्रिय-समय-नियम:**

केन्द्रीय-उपभोक्तृ-विषयक-मन्त्री पीयूष-गोयल: अद्य मुम्बईनगरे भारतीय-मानक-समयस्य प्रसाराय राष्ट्रिय-समय-नियमस्य उद्घाटनं कृतवान्। अयं नियम: मिलीसेकेंड-मितात्मकस्य समयस्य प्रतिबद्धतां सूचनां प्रकटयिष्यति। साङ्गणिक-सुरक्षामपि वर्धिष्यति। जना: TIME.NPLINDIA.IN उतवा TIME.NPLINDIA.ORG इत्यनेन माध्यमेन प्रयोगं कर्तुं शक्नुवन्ति।

**निर्वाचनायोग:**

निर्वाचनआयोग: श्व: लोकसभा-निर्वाचन-कार्यक्रमं समुद्घोषयिष्यति। नवदिल्ल्यां विज्ञानभवने श्व: मध्याह्ने निर्वाचनतिथिनां समुद्घोषणा कुर्यात्। अत्रावधौ लोकसभा-निर्वाचनेन सह केषुचित् राज्येषु विधानसभा-निर्वाचन कार्यक्रमा: अपि समुद्रघोषयिष्यन्ते। वर्तमान-लोकसभाया: कार्यकाल: अस्य वर्षस्य जूनमासस्य षोडशदिनांके अवसीयते। ध्यातव्यमस्ति यत् नवदशाधिक-द्विसहस्रतमे-वर्षे लोकसभा-निर्वाचन-कार्यक्रमस्य उद्घोषणा मार्चमासे दशमे दिनांके जाता असीत्। तदनु निर्वाचनं अप्रैल-मई-मासयो: सप्तचरणेषु सम्पन्नं जातम् असीत्। विगते लोकसभानिर्वाचने भारतीय-जनता-पार्टीतिदलेन त्रिचत्वारिंशदधिक-पञ्चशतं संसदीय-स्थासनेषु त्र्यधिक-त्रिशतं आसानानि विजितानि।

**बैडमिण्टन**

बैडमिण्टन प्रतिस्पर्धायां अद्य रात्रौ भारतीयक्रीडक: लक्ष्यसेन: मलेशियाया: ली०जी० जिया इत्यनेन सह ऑल-इंग्लैण्ड-ओपन-चैम्पियनशिप- प्रतिस्पर्धाया: प्रागुपान्यचक्रे स्पर्धिष्यते। राष्ट्रमण्डल क्रीडाया: स्वर्णपदक विजेता लक्ष्यसेन: प्र-प्रागुपान्त्यचक्रे डेनमार्कदेशीय: एन्डर्स-एन्टोनसेन इत्येष: पराजित:।

।। इति वार्ता: ।।